# ॥ श्रीवेङ्कटेश्वर वज्रकवच स्तोत्रम् ॥

**|| śrīveṅkaṭeśvara vajrakavaca stotram ||**

मार्कण्डेय उवाच -

mārkaṇḍeya uvāca -

नारायणं परब्रह्म सर्वकारणकारणम् ।

प्रपद्ये वेङ्कटेशाख्यं तदेव कवचं मम ॥ १ ॥

nārāyaṇaṁ parabrahma sarvakāraṇakāraṇam |

prapadye veṅkaṭeśākhyaṁ tadeva kavacaṁ mama || 1 ||

सहस्रशीर्षा पुरुषः वेङ्कटेशः शिरोऽवतु ।

प्राणेशः प्राणनिलयः प्राणान् रक्षतु मे हरिः ॥ २ ॥

sahasraśīrṣā puruṣaḥ veṅkaṭeśaḥ śiro'vatu |

prāṇeśaḥ prāṇanilayaḥ prāṇān rakṣatu me hariḥ || 2 ||

आकाशराड्सुतानाथः आत्मानं मे सदावतु ।

देवदेवोत्तमो पायाद्देहं मे वेङ्कटेश्वरः ॥ ३ ॥

ākāśarāḍsutānāthaḥ ātmānaṁ me sadāvatu |

devadevottamo pāyāddehaṁ me veṅkaṭeśvaraḥ || 3 ||

सर्वत्र सर्वकार्येषु मङ्गाम्बाजानिरीश्वरः ।

पालयेन्मामकं कर्मसाफल्यं नः प्रयच्छतु ॥ ४ ॥

sarvatra sarvakāryeṣu maṅgāmbājānirīśvaraḥ |

pālayenmāmakaṁ karmasāphalyaṁ naḥ prayacchatu || 4 ||

य एतद्वज्रकवचमभेद्यं वेङ्कटेशितुः ।

सायं प्रातः पठेन्नित्यं मृत्युं तरति निर्भयः ॥ ५ ॥

ya etadvajrakavacamabhedyaṁ veṅkaṭeśituḥ |

sāyaṁ prātaḥ paṭhennityaṁ mṛtyuṁ tarati nirbhayaḥ || 5 ||

॥ इति शिवम् ॥

|| iti śivam ||

www.kamakotimandali.com